संस्कृतवर्षस्मृतिग्रन्थमाला-३

प्रधानसम्पादकः

प्रो० वेम्पटि कुटुम्बशास्त्री

# तमिल्लघुकथाः

मूल-तमिल्-कथालेखकौ

महाकविः सुब्रह्मण्यभारती महाकविः कल्किकृष्णमूर्तिश्च

संस्कृतानुवादः

राजलक्ष्मी श्रीनिवासन्

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# प्ररोचना

दक्षिणे विशिष्य च तमिलनाडुप्रान्ते सुप्रथितयशाः महाकविः सुब्रह्मण्यभारती १८८२ तमेऽब्दे तमिलनाडुप्रदेशस्य एट्टपुराभिधं ग्रामं स्वजन्मना सनाथी कृतवान्। बालकविः सुब्रह्मण्यः सरस्वत्यादत्तवरप्रसाद आसीत्। असौ विद्वत्कविः स्वतन्त्रतासेनानी भूत्वा स्वकीयाभी रचनाभिः लोकं देशभक्तिभावभरितं चकार। अनेन कविताः, उपन्यासाः कथाः, भगवद्गीतायाः तमिलभाष्यं पाञ्चालिशपथम् इत्यादिभी रचनाभिः तमिलसाहित्यं सुसमृद्धम् अकारि। अपि च असौ रूढिप्राप्तानां अद्यत्वे अप्रासंङ्गिकानां अपि च क्रूराणां सामाजिकरीतीनां विरोधी आसीत्। कवेः एषः मनोभावः कथासु विशदं प्रतिबिम्बितः वर्तते।

एवमेव "कल्कि" इति नाम्ना सादरं सस्नेहं जनैः निर्दिष्टः कृष्णमूर्ति महोदयः १८९९ तमे वर्षे लब्धजनिरासीत्। असावपि महाकविः स्वातन्त्र्य–समरयोद्धा आसीत्। अस्य कथासंग्रहः 'वृहत्कथा' नाम्ना तमिलप्रान्ते प्रसिद्धः वर्तते।

अनयोः प्रेरणाप्रदाः कथाः समग्रे भारते प्रसरेयुः इति संकल्पेन श्रीमत्या राजलक्ष्मी श्रीनिवासन् महोदयया एतयोः कविवरयोः साहित्यं निर्मथ्य सुप्रचारयोग्याः सप्तकथाः सरल संस्कृतभाषया अनूद्य प्रस्तुताः। ताश्च पुस्तकरूपेण संस्थानस्य संस्कृतवर्षस्मृतिग्रन्थश्रृंखलायां प्राकाश्यं नीताः। पुस्तकमिदं पाठकानां करकमलयोः सर्पयन् हर्षातिरेकमनुभवामि।

तमिलभाषातः संस्कृतभाषायाम् अनुवादः नातिसरलः भवति तथापि श्रीमत्याराजलक्ष्मी श्रीनिवासन्–महोदयया महता परिश्रमेण योऽनुवादः कृतः तदर्थं सा अभिनन्दनार्हा अस्ति।

# अनुक्रमणिका


प्ररोचना — *iii-iv*

सरस्वतीवन्दनम्

- कल्किकृष्णमूर्तिः — १

अश्रुपत्रम्

- कल्किकृष्णमूर्तिः — २

सुभद्रायाः सोदरः

- कल्किकृष्णमूर्तिः — ११

चन्द्रिकायाः कथा

- सुब्रह्मण्यभारती — ५०

सुण्डोः संन्यासः

- कल्किकृष्णमूर्तिः — १२४

कोशाध्यक्षः विनायकराव्

- कल्किकृष्णमूर्तिः — १४०

हिमालयः अस्माकं गिरिः

- कल्किकृष्णमूर्तिः — १५२

गणपति-अय्यर् कुरूपवान्, अवलक्षणवान्, महोदरश्च । तेनैव 'लम्बोदरगणपतिः' इति सर्वे तं सम्बोधितवन्तः, 'जम्बूक-अय्यर्' इति बिरुदेन अलङ्कृतवन्तश्च । एकदा सः गुल्मे अदृष्यतया स्थित्वा, यदा कृषीवलः तत्र सन्निहितः न आसीत् तदा शालीन् चोरयित्वा अधावत् । परं गृहीतश्च । तदाप्रभृति तत्तु तस्य नियतनामधेयमभूत् । किं बहुना, गते वर्षे अपि यदा गणपति-अय्यर् क्षेत्रम् आगच्छत् तदा – 'हे लम्बोदरगणपते !', 'हे जम्बूक !' इति तं सम्बोध्य सुभद्रा परिहासं कृतवती, गृहान्तरं गत्वा प्रतिच्छन्ना अभवत् च । आः ! अम्ह हो ! हन्त ! तस्याः इयम् अवस्था जाता'' इति मद्वयस्यः आक्रोशत् ।

मन्मनः अपि द्रुतम् इति कथनीयं किम् ? ''तव पिता किं क्रूरः ? तव पिता इत्थं करोतु नाम, परं माता कथम् एतत् अनुमतवती ?'' इति मया पृष्टम् ।

''मम माता कदापि एतद्विवाहार्थम् अनुमतिं नियतं न दत्तवती स्यात् । नूनमेवैतत् । हा ! हन्त ! तया किं किं न कल्पितं मनसि ? मम पितरि अपि दोषारोपणं न शक्यते । वर्षद्वयं सः तत्र तत्र जामातृमार्गणे व्यग्रः अटन्नासीत् । एकः अंशः सम्मतः भवति चेत् अन्यः अंशः सम्मतः न भवति स्म । वरः सम्मतः चेत् जातकं न युज्यते स्म वधूवरयोः । यत्र उभयं सुष्ठु भवति तत्र वरपक्षीयाः सहस्रद्वयं सहस्रत्रयं वा कन्याशुल्कत्वेन पृच्छन्ति स्म । सः अपि किं वा कुर्यात् ? वस्तुतः तु सः मम पठनार्थमेव बहुवित्तं दत्तवान् । नो चेत् अद्य द्रव्याभावसमस्या न भवेत् । एतावता एव सहस्ररूप्यकाणाम् ऋणमस्ति, पुनरपि द्विसहस्रं रूप्यकाणि कुतः ऋणरूपेण प्राप्नुयात् सः ? को ददाति च ? अहमपि पापी एव । मयापि तस्य वचनं न अनुसृतम् । कन्याशुल्कं न स्वीकृतम् । यतः तत् मया न अनुमतम् । सः तु मय्येव विश्वसितवान् आसीत्''